४४ वेदांत

क्र. नं २२

पुराण ~~इतिहास~~ ३४९७

भागवत-एकादशस्कंध-प्रथमोध्यायः ②

१०१ पृ. ६१

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1) श्रीगणेशायनमः ॥ श्रीगोपालकृष्णायनमः ॥ श्रीबादरायणिरुवाच ॥ कृत्वादैत्यवधंकृ
ष्णःसरामोयदुभिर्वृतः ॥ भुवोवतारयद्भारंजविष्ठंजनयन्कलिं ॥ १ ॥ येकोपिताःसुबहुपां
डुसुताःसपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वानिमित्तमितरेतरतःसमेतान्हत्वा
नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥ भूभारराजपृतनायदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंत
यदप्रमेयः ॥ मन्येवनेर्ननुगतोप्यगतंहिभारंयद्यादवंकुलमहोह्यविषह्यमास्ते ॥ ३ ॥ नैवा
न्यतःपरिभवोस्यभवेत्कथंचिन्मत्संश्रयस्यविभवोन्नहनस्यनित्यं ॥ अंतःकलिंयदुकुल
स्यविधायवेणुस्तंबस्यवह्निमिवशांतिमुपैमिधाम ॥ ४ ॥ एवंव्यवसितोराजन्सत्यसंकल्पईश्व
रः ॥ शापव्याजेनविप्राणांसंजह्रेस्वकुलंविभुः ॥ ५ ॥ स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालो ॥१॥
चनंनृणां ॥ गीर्भिस्ताःस्मरतांचित्तंपदैस्तानीक्षतांक्रियाः ॥ ६ ॥ आच्छिद्यकीर्तिंसुश्लो
ल्ये कांवितत्यह्यंजसानुकौ ॥ तमोनयातरिष्यंतीत्यगात्स्वंपदमीश्वरः ॥ ७ ॥ राजोवाच ॥ ब्र

(२) (२)

नयिष्यति वो मंदा मुसलं कुलनाशनं ॥१६॥ तच्छ्रुत्वा नेति संत्रस्ता विमुच्य सहसोदरं ॥ सांबस्य द
दृशुस्तस्मिन्मुसलं खल्वयस्मयं ॥१७॥ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः ॥ इति वि
व्हलिता गेहानादाय मुसलं ययुः ॥१८॥ तच्चोपनीय सदसि परिम्लानमुखश्रियः ॥ राज्ञ आ
वेदयांचक्रुः सर्वयादवसन्निधौ ॥१९॥ श्रुत्वामोघं विप्रशापं दृष्ट्वा च मुसलं नृप ॥ विस्मिता भ
यसंत्रस्ता बभूवुर्द्वारकौकसः ॥२०॥ तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ॥ समुद्रस
लिले प्रास्यल्लोहं चास्यावशेषितं ॥२१॥ कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ॥
उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥२२॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेना
न्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥२३॥ भगवान्ज्ञातसर्वार्थ ई
श्वरोऽपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥२४॥ इति श्रीभागवते एकाद
प्रथमोध्यायः ॥१॥

ह्मण्यानांवदान्यानांनित्यंवृद्धोपिसेविनाम्॥विप्रशापःकथमभूद्वृष्णीनांकृष्णचेतसां॥८॥य
न्निमित्तसंवैशापोयादृशोद्विजसत्तम॥कथमेकात्मनांभेदएतत्सर्वंवदस्वमे॥९॥श्रीशुकउ॰
बिभ्रद्वपुःसकलसुंदरसंन्निवेशंकर्माचरन्भुविसुमंगलमाप्तकामः॥१०॥आस्थायधामरम
माणउदारकीर्तिःसंहर्तुमैछ्छतकुलंस्थितकृत्यशेषः॥१०॥कर्माणिपुण्यनिवहानिसुमं
गलानिगायज्जगत्कलिमलापहराणिकृत्वा॥कालात्मनानिवसतायदुदेवगेहेपिंडारकंस
मगमन्मुनयोविसृष्टा॥११॥विश्वामित्रोसितःकण्वोदुर्वासाभृगुरंगिराः॥कश्यपोवामदे
वोत्रिर्वसिष्ठोनारदादयः॥१२॥क्रीडंतस्तानुपव्रज्यकुमारायदुनंदनाः॥उपसंगृह्यपप्र
च्छुरविनीताविनीतवत्॥१३॥तेवेषयित्वास्त्रीवेषैःसांबंजांबवतीसुतं॥एषापृच्छतिवो
विप्राअंतर्वत्न्यसितेक्षणा॥१४॥प्रष्टुंविलज्जतीसाक्षात्प्रब्रूतामोघदर्शनाः॥प्रसो
ष्यंतीपुत्रकामाकिंस्वित्संजनयिष्यति॥१५॥एवंप्रलब्धामुनयस्तानूचुःकुपितानृप॥ज

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com